## APPENDIX X

Gokulanāthajī's Tract on the stanza

धन्यास्तु मूढमतयः (Bhāgavata X-18-11)

(N.B. The MS of the tract is available in the Vidyāvibhāga of Kāṅkarolī. It has three leaves of the size of 8"x 4" and has a note on it that it is unpublished. Its catalogue number is 35/21. The MS has mistakes at some places. I have tried to correct it, wherever it has been possible for me to do so.)

धन्यास्तु..... प्रणयावलोकैः। अथवा पीठिकां निरूप्य वेणुनादतत्कार्यनिरूपणे प्रथमं हरिणीषु तत्कार्यं निरूपयन्ति धन्यास्त्विति। हरिणीषु धन्यत्वं निरूपितम्। तत्र च तत्कृतपूजाया हेतुत्वं निरूपितम्। तत्र मध्ये तु-शब्द उक्तः। स च सर्वत्र पूर्वपक्षव्यावर्तकत्वेन निरूपितः। अत्र च पूर्वपक्षस्याश्रूयमाणत्वात् तु-शब्दस्य कुत्र प्रयोग इति चेत् सत्यम्। यद्यपि साक्षात्पूर्वपक्षश्रवणं नास्ति तथापि पाक्षिको दोषः परिहरणीय इति न्यायेन यदि कश्चित् पूर्वपक्षं संभावयेत्सोऽपि तु-शब्देन निवार्यते। ननु एतत्पूजां पूर्वपक्षस्यैवासंभवात्पाक्षिकदोषस्याप्यसंभव इति कथं तन्निवारणार्थमपि तु तु-शब्दः। सत्यम्। अतिदुष्टमनसां निर्दुष्टत्वेऽपि दोषस्फूर्तेः। यथा पित्तदुष्टरसनेंद्रियस्य शर्करायामविद्यमानस्यापि कटुत्वप्रतीतिः। मनोदुष्टत्वेऽपि कं प्रकारमाश्रित्य दोषस्फूर्तिसंभवः। तत्र प्रकारः। तत्कृतपूजायाः शास्त्रोक्तांगराहित्येन तस्याः पूजात्वस्यैवासंभवात् कथं तया धन्यत्वसिद्धिः। तत्र शास्त्रीयपूजांगानि गणयति। तत्र पूजकस्य स्वरूपज्ञानं स्वस्मिंस्तद्भिन्यत्वं पूजोद्देश्यत्वं फलानुसंधानं सततं सर्वेश्वरत्वेनपूज्यस्वरूपज्ञानं ततः पूजायां परमा श्रद्धा/पूजासाधनसंपादनं तथा देशकालमंत्रादीनामप्यंगत्वमिति

पक्षं तु-शब्दो व्यावर्तयति। ननु तु-शब्दे कथमेतद्व्यावृत्तिः।
तत्रोपपत्तिः। एषामंगानां मर्यादामार्गीयत्वात्। एतत्कृतपूजायाः
पुष्टिशुद्धपुष्टिमार्गीयत्वात् मर्यादामार्गीयांगाभावोऽत्र भूषाणं न तु
दूषाणं मार्गभेदात्। अन्यथा मार्गभेदो न स्यात्। तस्म तस्मात्
पुष्टिमार्गीयधर्माणां मर्यादामार्गे दूषणत्वं यथा तथा
मर्यादामार्गीयाणामस्मिन्मार्गे दूष दूषाणत्वमिति तु-शब्देन
मर्यादापक्षव्यावृत्ताविममुपपत्तिः। ननु तथापि तासां पशुत्वान्मूढत्वेन
शुद्धपुष्टिमार्गज्ञानात्कथं तत्कृतपूजाया धन्यत्वहेतुत्वम्। यद्यपि
त्वन्मते मूढमतित्वं तथापि अपि-शब्देन शुद्धपुष्टिमार्गेऽमूढमतित्वं
ज्ञाप्यते। तेनायमर्थः सिद्धः। मर्यादामार्गे मूढमतयः
पुष्टिमार्गेऽमूढमतयः। अन्यथा अपि-शब्दवैयर्थ्यर्थापत्तिः। ननु कथमेतासां
पुष्टिमार्गीयामूढत्वम्। मर्यादामार्गीयस्वस्वरूपविरुद्धज्ञानवत्त्वात्।
विरुद्धत्वं पशुत्वविस्मरणपूर्वकं नायिकात्वम्। प्रभावपितन्मार्ग-
प्रसिद्धधर्मवत्त्वज्ञानादमूढमतित्वम्। ननु कथमेवं ज्ञायते। एतासां
स्वस्मिन्प्रभावपि एतादृशं ज्ञानमन्यथा वक्ष्यमाणकार्यं नोपपद्येत।
कथं नोपपद्येतेति चेत्। यदि स्वस्मिन् पशुत्वज्ञानमेव भवेत् तज्जातिरति
भीरुत्वात् प्रभुसमीपे स्थितिर्न स्यात् भीरुत्वस्य बाधकत्वात्।
कदाचिन्नादाधीनतया स्थितावपि प्रभुसौन्दर्यविचित्रवेशानुसंधानपूर्वकं
दर्शनं न कुर्युः। एतावता भक्तभक्ति भावाधीना बाह्यकृतिर्निरूपिता
वेणुनादजन्या। पुनः वेणुनादजन्यमांतरभावं निरूपयन्ति। आकर्ण्य वेणुरणितं
सह कृष्ण कृष्णसारा इति। यद्यपि पूर्वं नंदनंदनमिति कथनादिदानीमाकर्ण्येति
कथनान्नंदनंदनं निरीक्ष्य वेणुरणितमाकर्ण्येति क्रियाद्वयमपेक्षितं
तथापि उभयत्राप्येकक्रियानिरूपणस्यायमाशयः। नंदनंदनमिति

निरूपणेन दर्शनस्यानुक्तसिद्धत्वाद्दर्शनस्य न पृथङ्निरूपणम्। वेणुनादश्रवणे क्रियानिरूपणेन दृष्टमपि स्वरूपं वेणुनादश्रवणद्वारैव हृद्यागतमिति एकक्रियानिरूपणम्। ननु कथमेतज्ज्ञायते नादाकर्णनद्वारैव स्वरूपं हृद्यागतमिति। तत्र हृद्यागमनज्ञापकं कार्यमाहुः। सह कृष्णसारा इति। अयमर्थः। सह नादप्रवेशेन सहैव यताकृष्णसारा जाताः। कृष्णः एव सारो यासाम्। अन्तः स्वरूपमनुभूय तादृश्यो जाताः। एतादृत्कमन्तः स्वरूपानुभवं विना न संभवतीति आकर्ण्यैत्येव क्रिया। ननु कथमेतासामन्तःस्वरूपानुभवो जात इति ज्ञायते। तत्र तज्ज्ञापकमाहुः पूजां दधुः विरचितां प्रणयावलोकैरिति। यद्यन्तः स्वरूपानुभवो न स्यात् तदा भगवति परमस्नेहो न स्यात्।स्नेहकार्यं च भावपूर्वककटाक्षैः भगवत्पूजनं च न स्यात्।ननु एतासां पुष्टिमार्गीयभावत्वान्निरूपिकाणां पुष्टिमार्गीयत्वात्तन्मार्गे सेवाया एव मुख्यत्वात् पूजायाश्च गौणत्वात् कथमेतन्मार्गीयभावकृतेः पूजात्वम्। तत्रहेतुः। यद्यप्यत्रापि भावाधीनकार्यत्वेन सेवात्वसंभवेऽपि पुष्टिमार्गीयसेवात्वाभावात् स्वामिनीनां च तस्या एव सेवात्वादेतत्कृतसेवायाः साक्षात्प्रभुसंबंध - राहित्येन पुष्टिरूपत्वम्। परंतु तत्कृतेर्भावाधीनत्वेऽपि पूज्यपूजकयोरिव परस्परं मनस्तोषजननात् तस्याः कृतेः पूजासाम्यात् पूजात्वमुक्तम्। तथाप्यत्रैतावान् विशेषः। तत्र पूज्यतोषस्य ज्ञातुमशक्यत्वात् तोषसंदेह एव। अत्र च भगवतोऽपि तत्प्रति पूजनेन तासु तोषनिश्चयेन ततोऽप्याधिक्यमेतत्कृतपूजायाः। प्रतिपूजनं च पूजां दधुः विरचितां प्रणयावलोकैरित्येतस्यान्योन्यपूजाप्रकारेणैवाचार्यैर्व्याख्यातमिति भगवत्कृतप्रणयावलोकनरूपपूजायाः प्रतिपूजनरूपत्वं स्पष्टमिति सर्वमनवद्यम्। इतिश्रीमद्वल्लभाभिधश्रीगोकुलनाथेन विरचितं धन्यास्त्वित्येतस्य विवरणं समाप्तिमगमत्। श्रीगोकुलेशो जयतितराम् ।।छ।।